# Devadibhihkritam Shri Maharama Stotram

# દેવાદિભિઃકૃતં શ્રીમહારમાસ્તોત્રમ્

## Document Information

Text title : Devadibhihkritam Shri Maharama Stotram

File name : devAdibhiHkRRitaMshrImahAramAstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 118/16-40||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# દેવાદિભિઃકૃતં શ્રીમહારમાસ્તોત્રમ્

સભાયાં સંહતાસ્તત્ર સર્વસ્ત્રીજાતિશોભિતાઃ ।
તુષ્ટવુઃ સહગન્ધર્વાઽપ્સરસશ્ચ મહારમામ્ ॥ ૧૬॥

નમો નમસ્તે પરમેશ્વરસ્ત્રીમૂર્દ્ધન્યમૂર્તેઽર્ધહરિસ્વરૂપે ।
મહાક્ષરે ચાક્ષરધામવાસે ત્રિસૃષ્ટિમાતઃ સુનમો નમસ્તે ॥ ૧૭॥

નમોઽવતારાદિસમગ્રવાસે નમઃ સમસ્તેશ્વરકોટિવાસે ।
નમઃ સમગ્રેશ્વરિકાનિવાસે મુક્તાનિકામુક્તગણાધિવાસે ॥ ૧૮॥

તુભ્યં નમઃ કૃષ્ણનરાયણાઙ્ગે સિદ્ધર્ષિસત્પિત્તૃસુદે નમસ્તે ।
સુરેશ્વરીવૃન્દસુસેવિતે તે શ્રીમાનવીરૂપિણિ તે નમોઽસ્તુ ॥ ૧૯॥

"શ્રીકમ્ભરે શ્રીલલિતે સનાથે સન્તોષિકામાતરથો નમસ્તે ।
ગજાનનેઽનન્તરમાનુરૂપે માતર્નમસ્તે હરિણીસ્વરૂપે ॥ ૨૦॥

સર્વેશ્વરિ સર્વરમાધિનાથે શ્રીમાણિકીપાશવતીપ્રમોદે ।
લક્ષ્મીમહાસાગરભાવિકે તે બ્રહ્મપ્રિયાસ્થે સતતં નમસ્તે ॥ ૨૧॥

કામાધિનાથેઽર્થિતદાનદક્ષે ચિન્તામણે ચિત્રજગત્પ્રસૂતે ।
મોક્ષપ્રદે ભાસ્કરચન્દ્રનેત્રે મન્દસ્મિતે યોગિનિ તે નમોઽસ્તુ ॥ ૨૨॥

નમો નમો ભણ્ડમહાસુરઘ્ને સમસ્તદૈત્યાન્તકકર્ત્રિ માતઃ ।
મુદ્રાધિનાથે ચ સુયન્ત્રરૂપે સર્વશ્રુતિપ્રોદ્ભવિકે નમસ્તે ॥ ૨૩॥

કૃષ્ણે પરે ચક્રસુષટ્કસંસ્થે ષડૂર્મિહર્ત્રિ શ્રમનાશિકે તે ।
ષડ્ભાવશૂન્યેઽષ્ટગુણાશ્રયે તે માતર્નમો મુખ્યસમસ્તરાજ્ઞિ ॥ ૨૪॥

કાન્તાધિનાથે કમલે સુનિર્મલે કલાધિનાથે ભુવનેશ્વરિ પ્રિયે ।
રસાયને સર્વરસાધિવાસિનિ દિવ્યસ્વરૂપે ચ નમોઽસ્ત્વભીક્ષ્ણશઃ ॥ ૨૫॥

સદાણિમાદ્યષ્ટકસેવનીયે ગોપાલકૃષ્ણાત્મકમગ્ચવાસે ।
દેવાધિદેવપ્રમદે સવિત્રિ લોકસ્ય માતઃ પ્રણમો નમસ્તે ॥ ૨૬॥

બ્રહ્મપ્રિયેબ્રહ્મરમે હરિશ્રિ બ્રહ્માત્મિકે શ્રીલલિતે નમસ્તે ।
બ્રહ્મામૃતસ્રોતસિ જન્મહન્ત્રિ બ્રહ્મેશ્વરિ શ્રીલલિતે નમસ્તે ॥ ૨૭॥

શુભાશ્રયે શુભપ્રદેઽક્ષરાખ્યે હતારિવર્ગે લલિતે નમસ્તે ।
સર્વાધિકે સર્વગતે સમસ્તસિદ્ધિપ્રદે શ્રીલલિતે નમસ્તે ॥ ૨૮॥

સર્વાઽમરાઽઽકાઙ્ક્ષિતપૂરયિત્રિ વરપ્રદે શ્રીલલિતે નમસ્તે ।
બિન્દુસ્થિતે બિન્દુસુરૂપિણિ શ્રીબૃહત્કુચાઽમ્ભોજવિલોલહારે ॥ ૨૯॥

ફલપ્રદે કમ્પલતેઽર્કશોભે સરોજવક્ત્રે લલિતે નમસ્તે ।
સારૈકભૂમે પુરુષોત્તમિ શ્રીભૂપદ્મિકાઽજા કમલાત્મિકે તે ॥ ૩૦॥

કૃપાનિધાને સુરકાર્યશાલિનિ શ્રીવૈષ્ણવિ શ્રીસકલાવતારિણિ ।
સારઙ્ગશાવાક્ષિ મનોહરે પ્રસુ માતર્નમસ્તે લલિતેઽતિસુન્દરિ ॥ ૩૧॥

શ્રીમન્મહાલક્ષ્મિ સમૃદ્ધિદાયિનિ વિપન્નિવારેઽતિસનાતનિ પ્રમે ।
ત્વયા સમસ્તં ભુવનં સુરક્ષિતં ભણ્ડાસુરાદીન્ વિનિહત્ય સઙ્ગરે ॥ ૩૨॥

શ્રીશમ્ભુના ભસ્મિત એવ મન્મથો ભસ્મોત્થભણ્ડોઽપિ હતઃ પુનસ્ત્વયા ।
કામસ્ય ભસ્માઽપિ સુભસ્મિતા યતો નિષ્કામતા નીરતિતા પ્રદર્શિતા ॥ ૩૩॥

સ્થૂલં શરીરં મદનસ્ય શમ્ભુના દગ્ધં ચ સૂક્ષ્મં તુ તતઃ પુનસ્ત્વયા ।
એવં શરીરોભયવર્જિતં પતિં વિલોક્ય તજ્જીવનમાર્થયદ્રતિઃ ॥ ૩૪॥

તદા પુનઃ કારણવર્ષ્મ કલ્પનાત્મકં યદાસીદ્બહુવાસનાત્મકમ્ ।
તસ્માદદૃશ્યં રમણસ્ય વર્ષ્મ વૈ વ્યાપ્તં બૃહત્કૃત્ય દદૌ રતિસ્ત્રિયૈ ॥ ૩૫॥

રતિર્નિજં કાન્તમનુત્તમં પુનઃ સમસ્તલોકસ્થિતિકં હૃદિ સ્થિતમ્ ।
અદૃશ્યરૂપં પ્રસમીક્ષ્ય રઞ્જિતા પ્રસન્નતાપૂર્વકમાશ્લિષત્ પતિમ્ ॥ ૩૬॥

અવર્ષ્મરૂપો હ્યપિ વર્ષ્મકાર્યકૃત્ કામો ભવત્યા વિહિતસ્તતો હ્યસૌ ।
તવાજ્ઞયા વ્યાપ્તિમગાચ્છિવાપતૌ સ્કન્દોઽભવચ્છૈલસુતાસુયોગતઃ ॥ ૩૭॥

સ્થૂલસ્ય કામસ્ય જયસ્ય કર્તા શમ્ભુસ્વરૂપો ભવતીતિ બોધ્યઃ ।
સૂક્ષ્મસ્ય કામસ્ય જયસ્ય કર્તા લક્ષ્મીસ્વરૂપો ભવતીતિ બોધ્યઃ ॥ ૩૮॥

કુવાસનાઽનઙ્ગજયસ્યકર્તા નારાયણશ્ચોર્ધ્વગતિર્હિ બોધ્યઃ ।
એવં ત્વયા બોધિતમેવ સર્વેભ્યો નઃ પરેશેશ્વરિ મુક્તયે નઃ ॥ ૩૯॥

ઇતિ સ્તુત્વા પૂજયિત્વા નિષેદુર્હૃષ્ટમાનસાઃ ।
ઉત્સવં તન્નિમિત્તં ચ ચક્રુઃ સર્વે રણાજિરે ॥ ૪૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૧૮-અધ્યાયાન્તર્ગતં દેવાદિભિઃકૃતં શ્રીમહારમાસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૧૮/૧૬-૪૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 118/16-40..

Proofread by PSA Easwaran

*Devadibhihkritam Shri Maharama Stotram*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*